Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

मिथिलाशोधसंस्थानग्रन्थमालायाः प्राचीनग्रन्थावली एकोनत्रिंशं पुष्पम्

महाकुलाचार्यमहर्षिदुर्वाससा प्रणीता

# आर्यार्द्विशती

सम्पादकः

विद्यावाचस्पति प० श्री रामचन्द्र मिश्रः

मिथिलाविद्यापीठप्रधानेन श्रीमता काशीनाथमिश्रेण
प्रकाशिता

ऐशवीयाब्दः १९७९

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



15.5

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Mithila Institute Series Ancient Text No. 29

20298

# ĀRYĀDVIŚATĪ
of
# MAHARṢI DURVĀSĀ

Edited by
Vidyāvācaspati
PANDIT ŚRĪ RĀMACHANDRA MIŚRA

Published by
KASHINATH MISHRA
Director,
Mithila Institute of post-Graduate Studies and Research
in Sanskrit Learning, Darbhanga

1979

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

*Copies of this Volume can be had of the Director, Mithila Institute of Post-Graduate Studies and Research in Sanskrit Learning, Darbhanga on payment of Rs. 2/50 by M. O. or Postal Order or Cash.*

*First Edition 250 Copies*

*Printed by the Hindustan Press, Laheriasarai and published by the Director, Mithila Institute of Post-Graduate Studies and Research in Sanskrit Learning, Maheshanagar, Darbhanga*

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

20298

*The Government of Bihar established the Mithila Institute of Post-Graduate Studies and Research in Sanskrit Learning at Darbhanga in 1951 with the object,* **inter alia**, *to promote advanced studies and research in Sanskrit Learning to bring together the traditional Pandits with their profound learning and the modern scholars with their technique of research and investigation, and to publish work of permanent value to scholars. This institute is one of the five others planned by this Government as a token of their homage to the tradition of learning and scholarship for which ancient Bihar was noted. Apart from the Mithila Institute, four others have been established and have been doing useful work during the last eighteen or nineteen years—Nalanda Institute of Research and Post-Graduate studies in Buddhist learning and Pali at Nalanda, K.P. Jaisawal Research Institute at Patna, the Bihar Rashtra Bhasha Parishad for research and advanced studies in Hindi at Patna, and the Vaishali Institute for Post-Graduate studies in Prakrit and Jainology at Vaishali. In the establishment of the Mithila Institute the State Government received a generous donation from Maharajadhiraja of Darbhanga for construction of the building on a plot of land also donated by him.*

2 *As part of this programme of rehabilitating and reorientating ancient learning and scholarship, the editing and publication of this volume have been undertaken with the co-operation of scholars in Bihar and outside. The Government of Bihar hope to continue to sponsor such projects and trust that this humble service to the World of scholarship and learning would bear fruit in the fulness of time.*

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

# आर्याद्विशती

महाकुलाचार्यमहर्षिदुर्वाससा प्रणीता ।

सम्पादकः—

श्रीरामचन्द्रमिश्रः, दरभङ्गासंस्कृतशोधसंस्थानस्थः ।

संस्कृते स्तोत्रसाहित्यस्य विशालतायां विद्यमानायामपि तदीयकाव्यमाधुर्यां प्रसृमरायामपि भक्तिप्ररूढ़कविताबद्धस्तोत्रस्य काप्यन्यैव विच्छित्तिरिति विदन्ति विज्ञाः। एतदेव प्रमापयितुं मयाऽऽर्याद्विशतीयं यथाबुद्धिवैभवं परिष्कृत्यात्र प्रकाश्यते। उपलब्धायाएकस्या मातृकाया अत्यशुद्धतया कृतेऽपिप्रयासेऽशुद्धयो निःशेषभावेनापासिता इति न विश्वसिमि। बहुस्थलेषुत्रुटितान् भागानहमकल्पयं तेऽपितथ्यभावेनतथेति कथनेऽपिनाहमाग्रहं वहे। यावता पाठावधारणकर्मणा ममान्तःसन्तोषः समजनि तावतैव पाठकानामप्यांशिकः प्रमोदोजायतामितिममेह कामना।

आर्याणां पुण्यपाकप्रचयप्राप्यता पण्डितपरिषदि प्रतीतपूर्वा। मणिद्वीपस्य सौन्दर्यशालित्वमपि समन्ततः समस्तसुधीसमूहसम्मतम्। तदिदमुभयमिह मिलत् किमपिनूतनभिव विश्वमुपस्थापयति।

उक्तिविशेषःकाव्यम् इतिप्राचीनानामुद्घोषः। सोयऽमुक्तिविशेषोत्र नानाभङ्गी र्बिभ्रद्विदुषामन्तःसन्तोषायोपनिबद्धो विलोक्यते, यथा—चन्द्रशेखररूपार्थप्रतिपिपादयिषयाऽत्र-

१—'कुवलयिनीजारकोरकापीड़म्'
२—कुवलयजीवातुशावकोत्तंसम्'
३—शीताशुखण्डचूड़ालम्'
४—'कोकारिमण्डितकिरीटम्'
५—'हरिणाङ्कखण्डकृतचूड़म्'
६—'कलाधरशिखण्ड़म्'
७—शीतांशुस्तवकचुम्बितकिरीटम्'
८—उत्पलबन्धुस्तनन्धयापीड़म्'
९—कैरविणीविटचूड़म्'

इत्यादयो भङ्गयः,—एवमेवकृशोदरत्वे वक्तव्ये—

१—'अणुदायादवलग्नम्'
२—'परोक्षमवलग्ने'
३—'अम्बरवलग्नम्'

इत्यादयश्च भङ्गयः कामपि विशिष्टां शैलीं समर्थयन्ति।

तदियं द्विशती काव्यपरिशीलनरसिकैःसाकमेव भक्तिभृतस्वान्तानपि प्रमोदयत्विति विश्वासेनास्याः प्रकाशनं प्रक्रम्यते।

(सम्पादकः)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

# महर्षिणा दुवसिसा विरचिता

आर्याद्विशती

श्रीगणेशायनमः ।

श्रीमन्महात्रिपुरसुन्दर्यै सदक्षिणकालिकायै श्रीमन्महोग्रतारायैनमः ।

वन्दे गजेन्द्रवदनं वामाङ्कारूढ़वल्लभाश्लिष्टम् ।
कुङ्कमपरागशोणं कुवलयिनीजारकोरकापीड़म् ॥१॥

स जयति सुवर्णशैलः सकलजगच्चक्रसङ्घटितमूर्त्तिः ।
काञ्चननिकुञ्जवाटीकन्दलदमरीप्रपञ्चसङ्गीतिः ॥२॥

हरिहयनैऋतमारुतहरितामन्तेष्ववस्थितं तस्य ।
विनुमः सानुत्रितयं विधिहरिगौरीशविष्टपाधारम् ॥३॥

मध्ये पुनर्मनोहररत्नरुचिस्तम्भरञ्जितदिगन्तम् ।
उपरिचतुश्शतमुत्तुङ्गशृङ्गपुञ्जव मुपासे (?) ॥४॥

तत्रचतुःशतयोजनपरिणाहं देवशिल्पिनारचितम् ।
नानासालपनोज्ञं नमाम्यहं नगरमादिविद्यायाः ॥५॥

प्रथमं सहस्रपूर्वकषट्शतसङ्ख्याकयोजनं परितः ।
वलयीकृतं सुगात्रं वरणं शरणं व्रजाम्यदोरुपम् ॥६॥

तस्योत्तरे समीरणयोजनदूरे तरङ्गितच्छायः ।
घटयतु मुदं द्वितीयो वटः सुनासीरनिर्मितः सालः ॥७॥

उभयोरन्तरसीमन्युद्दामभ्रमररञ्जितोदारम् ।
उपवन मुपास्महे वयमुररीकृतमन्दमारुतस्पन्दम् ॥८॥

आलिङ्ग्य भद्रकालीमासीनस्तत्र हरिशिलाश्यामः ।
मनसि महाकालोमे विहरतु मधुपानविभ्रमन्नेत्रः ॥९॥

तार्त्तीयीको (व) रणस्तस्योत्तरसीम्नि वातयोजनायामः ।
ताम्रेण रचितमूर्त्तिस्तनुतादाचन्द्रतारकं भद्रम् ॥१०॥

गध्ये तयोश्च मणिमयपल्लवशाखाप्रसूनपक्ष्मलिताम् ।
कल्पानोकहवाटीङ्कुलये मकरन्दपङ्किलां बालाम् ॥११॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



तत्रमधुमाधवश्रीतरुणीभ्यान्तरलट्टक्चकोराभ्याम् ।
आलिङ्गितोऽवतान्मामनिशम्प्रथमत्तुं बालाग्रः ॥१२॥

नमत तदुत्तरभागे नाकिपथोल्लङ्घिशृङ्गसङ्घातम् ।
सीमाकृतिन्तुरीयं सितकिरणलोकनिर्मलं सालम् ॥१३॥

सालद्वयान्तराले तरलानिलपोतचारुसुभगायाम् ।
सन्तानवाटिकायां रक्त ञ्चेतोस्तु सतत मस्माकम् ॥१४॥

तत्रच तपना (लोकी) सम्राज्ञीचरणसान्द्रितस्वान्तः ।
शुक्रशुचिस्त्रीसहितोग्रीष्मत्तुं दिशतु कीर्त्तिमाकल्पम् ॥१५॥

उत्तरसीमनितस्योन्नतशिखरोत्कम्पिहाटकपताकः ।
प्रकटयतु पञ्चमोनः प्राकारः कुशलमारकूटमयः ॥१६॥

प्राकारयोश्च मध्ये पल्लवितानिभृतपञ्चमोन्मेषा ।
हरिचन्दनद्रुवाटी हरतादामूललस्मदनुतापम् ॥१७॥

तत्र नभःश्रीमुख्यै स्तरुणीवर्गैः समन्वितः परितः ।
वज्राट्टहासमुखरो वाञ्छापूर्त्तिं तनोतुवर्षत्तुंः ॥१८॥

मारुतयोजनदूरे महनीयस्तस्य चोत्तरे भागे ।
भद्रं कृषीष्ट षष्ठः प्राकार पञ्चधातुलोहमयः ॥१९॥

अनयोर्मध्ये सन्तत मङ्कुरदतिदिव्यकुसुमगन्धायाम् ।
मन्दारवाटिकायां मानसमङ्कीकरोतु मे विहृतिम् ॥२०॥

तस्यामिषोर्ज्जलक्ष्मीतरुणीभ्यांशरदृतुःसहितः ।
अभ्यर्चयन्स जीयादम्बा मामोदमेदुरैःकुसुमैः ॥२१॥

तस्यर्षिसङ्ख्ययोजनसदूरे देदीप्यमानशृङ्गौघैः ।
कलधौतरचितमूर्त्तिःकल्याणंदिशतु सप्तमःसालः ॥२२॥

मध्ये तयो र्मरुत्पथ लङ्घितविटपाग्रविधृतकलकण्ठी ।
श्रीपारिजातवाटी श्रियमनिशं दिशतु शीतलोद्देशा ॥२३॥

तस्यामतिप्रियायां सहखेलनसहस्यलक्ष्मीभ्याम् ।
सामन्तो भूपकेतो र्हेमन्तो भवतु हेमवृद्धयैनः ॥२४॥

उत्तरतस्तस्य महानद्भुतहुतभुक्शिखारुणमयूखः ।
तपनीयखण्डरचित स्तनुतादायुष्यमष्टमोवरणः ॥२५॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



कादम्बविपिनवाटी मनयोर्मध्येच कल्पितावासाम् ।
कलयामि विकचकोरककन्दलितामोदतुन्दिलसमीराम् ॥२६॥

तस्यामतिशिशिराकृतितपस्तपस्याख्यमासलक्ष्मीभ्याम् ।
शिवमनिशंसहितोमे शिशिरत्तुं दिशतुशीतलदिगन्तः ॥२७॥

तस्यां कदम्बवन्यान्तत्प्रसवामोदमिलितमधुगन्धम् ।
सप्तावरणमनोज्ञं शरणं समुपैमि मत्रिणीशरणम् ॥२८॥

तत्रालये विशाले तपनीयारचिततरलसोपाने ।
माणिक्यमण्ड़पान्ते महतिच सिंहासने सुमणिखचिते ॥२९॥

विन्दुत्रिकोणपञ्चद्विपनृपवसुवेदरेखाढ्ये ।
चक्रे सदानिविष्टां षष्ठाष्टत्रिंशदक्षरेशरेशानीम् ॥३०॥

तापिच्छमेचकाङ्गीं तालीदलघटिततादङ्काम् ।
ताम्बूलपूरितमुखीं ताम्राधरविम्बदष्टदरहासाम् ॥३१॥

कुङ्कुमपङ्किलदेहांकुवलयजीवातुशावकोत्तंसाम् ।
कोकनदशोणचरणां कोकिलनिक्वाणकोमलालापाम् ॥३२॥

वामांसललितचूलीवलमानकदम्बमालिकाभरणाम् ।
मुक्ताविलसितकाञ्चीमुग्धालीमिलितचित्रकोदाराम् ॥३३॥

करविधृतकीरशावककलनिनदव्यक्त निखिलनिगमार्थाम् ।
वामकुचसङ्गिवीणावादन (विनिमीलित, (क्षि) युगाम् ॥३४॥

आपाटलांशुकधरा मादिरसोन्मेषपोषितकटाक्षाम् ।
आम्नायसारगुटिका माद्यां सङ्गीतमातृकां वन्दे ॥३५॥

तस्य च सुवर्णसालस्योत्तरतस्तरुणकुङ्कुमच्छायः ।
शमयतु मम सन्तापं सालो नवमः स पुष्परागमयः ॥३६॥

अनयोरन्तरवसुधाः प्रणुमः प्रत्यग्रपुष्परागमयाः ।
सिंहासनेश्वरीमनुचिन्तननिस्तन्द्रसिद्धनीरन्ध्राः ॥३७॥

तत्सालोत्तरदेशे तरुणजपाकुसुमधोरणीशोणः ।
प्रशमयतु पद्मरागप्राकारो मम पराभवन्दशमः ॥३८॥

अन्तरभूकृतवासानयोरपनीतवैमुख्यान् ।
चक्रेशीपदभक्तांश्चारणमुख्या नहिनशंवन्दे ॥३९॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



सारङ्गवाहयोजनदूरे सङ्घटितकेतनस्तस्याः ।
गोमेदकेन रचितो गोपायतु मां समुन्नतःसालः ॥४०॥

वप्रद्वयान्तरुर्व्यां वटुकै विविधैश्च योगिनीवृन्दैः ।
सततं समर्चितायाः सङ्कर्षिण्या नमामि चरणाब्जम् ॥४१॥

तापसयोजनदूरे तस्याश्चोत्तुङ्गगोपुरोपेतः
वाच्छापूर्त्यै भवताद्वज्रनिकरनिर्मितो वप्रः ॥४२॥

वरणद्वयान्तराले वासजुषो विविधमणिगणाकल्पाः ।
रम्भादिविविधवेश्या रचयन्तु महान्तमस्मदानन्दम् ॥४३॥

तत्र सदा प्रवहन्ती तटिनी वप्राभिधा चिरञ्जीव्यात् ।
चटुलोर्मिपटलनृत्यत्कलहंसीविरुतकल्पितानन्दा ॥४४॥

रोधसि तस्या रुचिरे वज्रे शी जयतुवज्रभूषाढ्या ।
वज्रप्रदानतोषितवज्रिमुखत्रिदशविनुतचारित्रा ॥४५॥

तस्योदीच्यां हरिति स्तवकितसुषमावलीढ़विशदन्तः ।
वैदूर्यरत्नरचितो वैमल्यं दिशतुचेतसो वरणः ॥४६॥

अधिमध्यमेतयोः पुनरम्बाचरणावलम्बितस्वान्तान् ।
कर्कोटकादिनागान्कलयामः किञ्चबलिमुखान्दनुजान् ॥४७॥

गन्धवहसङ्ख्ययोजनदूरेगगनोर्ध्वगाङ्घ्रिकस्तस्य ।
वासरमणिप्रणीतो वरणो वहुलयतुवैदुषीं विशदाम् ॥४६॥

मध्यक्षोण्यामनयोर्महेन्द्रनीलाब्जकानिसरांसि ।
शातोदरीसहायान्भूपालानपि पुनः पुनः प्रणुमः ॥४९॥

आशुगयोजनदूरेतस्याः कान्त्यातिधवलितदिगन्तः ।
मुक्ताविरचितगात्रो मुहुरस्माकं मुदे भवतु वप्रः ॥५०॥

अधिवप्रद्वयमध्यं पूर्वस्यां दिशि पुरन्दरः श्रीमान् ।
अभ्रमुविटाधिरूढ़ा विभ्रममस्माकमनिश मातनुताम् ॥५१॥

तत्कोणे व्यजनस्रक्तोमरपात्रस्रुवान्नशक्तिधरः ।
स्वाहास्वधासमेमतः सुखयतु मां हव्यवाहनः सुचिरम् ॥५२॥

दक्षिणदिगन्तराले दण्डधरो नीललोहितच्छायः ।
त्रिपुरापदाब्जभक्तस्तिरयतुमम निखिलमंहसोनिकरम् ॥५३॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



तस्यैव पश्चिमायां दिशि मलिनेन्दीवरश्यामः ।
खेटासियष्टिधारी खेदानपनयतुयातुधानोमे ॥५४॥

तस्मादुत्तरभागे धवलाङ्गो विपुलभूषवरारूढः ।
पाशात्तपाणिपद्मः पाशी विदलयतु पापजालानि ॥५५॥

वन्दे तदुत्त [रां] शे वायुञ्च चमूरुवरवाहम् ।
कोरकिततत्त्ववोधान् गोरक्षप्रभृतियोगिनोऽपिमुहुः ॥५६॥

तरुणी रिड़ाप्रधानास्तिस्रोवाकस्य तत्र कृतवेषाः ।
प्रत्यग्रकापिशायनपानपरिभ्रान्तलोचनाः कलये ॥५७॥

तस्यैव पूर्वभागे धनदं ध्यायामि शेवधिकुलेशम् ।
अपि च मणिभद्रमुख्यानमूवाचरणावलम्बिनो यक्षान् ॥५८॥

तस्यैवोत्तरभागे तपनीयारचितगोपुरे नगरे ।
कात्यायनीसहायं कलये शीतांशुखण्डचूड़ालम् ॥५९॥

तत्पुरषेऽशवरणस्थलभाजस्तरुणचन्द्रचूड़ालान् ।
रुद्राध्याये पठितान् रुद्राणीसहचरान् भजे रुद्रान् ॥६०॥

पवमानसङ्ख्योजनदूरे वालतृणमेचकस्तस्य ।
सालो मरकतरचितस्सम्पदमचलां श्रियञ्चपुष्णातु ॥६१॥

आवृत्तियुगान्तरितेहरितमणिनिवहमेचके देशे ।
हाटकतालीविपिनं हालाघटघटितविटपमाकलये ॥६२॥

तत्रैव मन्त्रिणीगृहपरिणाहन्तरलकेतनं सदनम् ।
मरकतसौधमनोज्ञं दद्यादायूंषि दण्डनाथायाः ॥६३॥

सदने तत्र हरिन्मणिसङ्घटिते मणिमयस्तम्भे ।
कार्त्तस्वरमयपीठे कनकमयाम्बुरुहकर्णिकामध्ये ॥६४॥

बिन्दुत्रिकोणवत्तुलपड्दलवृत्तद्वयान्विते चक्रे ।
सञ्चारिणी दशोत्तरशतार्णमनुराजकमलकुलहंसी ॥६५॥

कोलवदना कुशेशयनयना कोकारिमण्डितकिरीटा ।
सन्तप्तकाञ्चनाभा सन्ध्यारुणचेलसंवृतनितम्बा ॥६६॥

हलमुसलखड्गचक्राङ्कुशपाशाभयवराभरितहस्ता ।
कूलङ्कषानुकम्पाकुङ्कुमजम्बालितस्तनाभोगा ॥६७॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



धूर्तानामार्त्तिहरा कर्णाशेषावलग्नकमनीया ।
आर्त्तालीशुभदात्री वार्त्ताली भवतु वाच्छितार्थाय ॥६८॥

तस्याः परितो देवीसुप्रेश्युत्तानभैरवीमुख्याः ।
प्रणमत जम्भिन्याद्या भैरववर्गांश्च हैतुकमुखान् ।।६९॥

पूर्वोक्तसङ्ख्ययोजनदूरे पूषांशुपाटलद्वारः ।
विद्रावयतु मदार्त्तिं विद्रुमसालो विशङ्कटद्वारः ॥७०॥

आवरणयो रहर्निशमन्तर्भूमौ प्रकाशशालिन्याम् ।
आसीनमम्बुजासनमभिनवसिन्दूरशोणमहमीडे ॥७१॥

वरणस्य तस्य मारुतयोजनतो विमलगोपुरद्वारः ।
सालो नानारत्नैः सङ्घटिताङ्गः कृषीष्ट मदभीष्टम् ॥७२॥

अन्तरकक्ष्यामनयोरविरलशोभातिचण्डिलोद्दे शाम् ।
माणिक्यमण्डपाख्यांमहतीमधिहृदयमनिशमाकलये ॥७३॥

तत्र स्थितं प्रसन्नं तरुणतमालप्रबालकिरणाभम् ।
कर्णविलाम्बिकुण्डलकन्दलिताभीषुपुकलितकपोलम् ॥७४॥

शोणाधरं शुचिस्मितशोणाङ्गमिवास्यमेधमानकृपम् ।
मुग्धैणमदविशेषकमुद्रितनिटिलेन्दुरेखिकारुचिम् ॥७५॥

नालीकदलसहोदरनयनाञ्चलनटितमनसिजाकूतम् ।
कमलाकठिनपयोधरकस्तूरीघुसृणपङ्किलोरस्कम् ॥७६॥

चाम्पेयगन्धिकेश्यंशम्पासब्रह्मचारिकौशेयमृगय ।
श्रीवत्सकौस्तुभधरं श्रितजनरक्षाधुरीणचराणाब्जम् ॥७७॥

कम्बुसुदर्शनविलसत्करपद्मं कण्ठलोलवनमालम् ।
मुचुकन्दमोक्षफलदं मुकुन्दमानन्दकन्दमवलम्बे ॥७८॥

तद्वरणोत्तरभागेतारापतिबिम्बचुम्बिनिजशृङ्गः ।
विविधणिगणसुखचितो वितरतुसालोविनिर्मलान्धिपयाम् ॥७९॥

प्राकारोत्तरकक्ष्यां पृथुतररत्नप्रभापटलपूर्णाम् ।
नमतसहस्रस्तम्भकमण्डपनाम्नीं च विश्रुतां भुवने ॥८०॥

प्रणुमस्तत्र भवानीसहचरमीशानमिन्दुखण्डधरम् ।
शृङ्गारनायिकामनुशीलनभाजोऽपिनन्दिशृङ्गिमुखान् ॥८१॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



तत्रैणवाहयोजनदूरे वन्दे मनोहरं वप्रम् ।
अङ्कुरमणि किरणाभामन्तरकक्ष्यां विनिर्मलामनयोः । ८२॥

तत्रैवामृतवापीन्तरलतरङ्गावलीढ़तटयुग्माम् ।
मुक्तामयकलहंसीम्मुद्रितकनकारविन्दसन्दोहाम् ॥८३॥

शक्रोपलमयभृङ्गीसङ्गीतोन्मेषपोषितदिगन्ताम् ।
काञ्चनमयाङ्गविलसत्कारण्डवखण्डताण्डवमनोज्ञानम् ॥८४॥

कुरुविन्दात्मकहल्लककोरकसुषमासमूहपाटलिताम् ।
कलये सुधास्वरूपां कन्दलितामोदकैरवसमूहाम् ॥८५॥

तद्वापिकान्तरालेतरलमणिप्रोतसीम्नि विहरन्तीम् ।
सिन्दूरपाटलाङ्गीं सितकिरणाङ्कुरवकल्पितावासाम् ॥८६॥

पद्मेन्दुबिम्ववदनां पल्लवशोणाधरस्फुरितहासाम् ।
कुटिलकवरीङ्कुरङ्गनयनां कुण्डलस्फुरितदिगन्ताम् ॥८७॥

निकटस्थपोतलीलालाशक्तिशतविधृतहेमशृङ्गजमैः ।
परिषिञ्चतीं परितस्तारास्तारुण्यगर्वितां वन्दे ॥८८॥

प्रागुक्तसङ्ख्योजनदूरेप्रणमामिवुद्धिमयसालम् ।
अनयोरन्तरकक्ष्यामष्टापदरूपमेदिनीरुचिराम् ॥८९॥

कादम्बरीनिवासां कलयाम्यानन्दवापिकां तस्याम् ।
शोणाश्मनिवहनिर्म्मितसोपानश्रेणिशोभमानतटाम् ॥९०॥

माणिक्यतरणिशैलयां मध्येतस्यांमदारुणकपोलाम् ।
अमृतेशौत्यभिधानामन्तःकलयामिवारुणीन्देवीम् ॥९१॥

सौवर्णकेलिपातनहस्ताः सौन्दर्यगर्विता देव्यः ।
तत्परितः स्थितिभाजो वितरन्त्वस्माकमायुषां वृद्धिम् ॥९२॥

तस्यपृषदश्वयोजनदूरेऽहङ्कारसालमतितुङ्गम् ।
वन्दे तयोश्चमध्ये कक्ष्यां बलमानमलयपवमानाम् ॥९३॥

विनुमोविमर्शवापीं विमलां च सुधासुरूपिणीं तत्र ।
वेलातिलङ्घिवीचीकोलाहलभरितकुवलयवाटीम् ॥९४॥

तत्रैव सलिलमध्ये तापिच्छदलप्रसूनकिरणाभाम् ।
श्यामलकञ्चुकलसितांश्यामां विधुबिम्बड़म्बरहरास्याम् ॥९५॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


आभुग्नमसृणमल्लीहसितामयुग्मशरकार्मुकविलासाम् ।
मन्दस्मिताञ्चितमुखींमणिमयताटङ्कमण्डितकपोलाम् ॥९६॥

कुरुबिन्दकिरणनिलयांकुलाचलस्पर्द्धिकुचनमन्मध्याम् ।
कुङ्कुमविलिप्तगात्रीं कुरुकुल्याम्मनसि कुर्महे सततम् ॥९७॥

तत्सालोत्तरदेशे भानुमयं वप्रमाश्रये दीप्तम् ।
मध्यन्तु विपुलमनयोर्मध्ये विश्रान्तमातनोत्वंहः ॥९८॥

तत्र कुरुबिन्दपीठे तामरसे कनककर्णिकामध्ये ।
आसीनमरुणवसनञ्चाम्लानप्रसवमालिकाभरणम् ॥९९॥

चक्षुष्मतीप्रकाशनशक्तिच्छायासमारचितकेलिम् ।
माणिक्यमुकुटरम्यं वन्दे मार्त्तण्डभैरवं हृदये ॥१००॥

इन्दुमयसालमीड़े तस्योत्तरतस्तुषारगिरिगौरम् ।
अत्यन्तशिशिरमारुतमनयोर्मध्यञ्च चन्द्रिकोद्गारम् ॥१०१॥

तत्र प्रकाशमानं तारानिकरैश्च सर्वतः सेव्यम् ।
अमृतमयकान्तिकन्दलमन्तः कलयामि कुन्दसितमिन्दुम् ॥१०२॥

शृङ्गारसालमीड़े शृङ्गोल्लसितं तदुत्तरे देशे ।
मध्यस्थले तयोरपि महतीं शृङ्गारदीर्घिकां विपुलाम् ॥१०३॥

तत्र मणिनौस्थिताभिस्तपनीयारचितहस्ताभिः ।
शृङ्गारदेवताभिस्सहितं परिखाधिपं भजे सदनम् ॥१०४॥

शृङ्गारवरणवर्यस्योत्तरतस्सकलविबुधसंसेव्यम् ।
चिन्तामणिगणरचितं चिन्तां दूरीकरोतु मे सदनम् ॥१०५॥

मणिसदनसालयोरधिमध्यं दशतालभूमिरुहदीर्घम् ।
वर्णैः सुवर्णवर्णं युक्तं काण्डैश्च योजनोत्तुङ्गैः ॥१०६॥

मृदुलैस्तालीविटपकसालैर्मिलिताम्रकेसरकदम्बैः ।
सन्ततगलितमरन्दस्त्रोतोनिर्यन्मिलिन्दसंदोहाम् ॥१०७॥

पाटीरपवनबालकधाटीनिर्यत्परागपिञ्जरिताम् ।
पद्माटवीं भजामः परिमलकल्लोलनोदान्ताम् ॥१०८॥

दिव्यर्धपात्रधारी तस्याः पूर्वदिशि दशकलायुक्तः ।
वलयितमूर्त्तिर्भगवान् बहिःक्रोशोन्नतश्चिरंजीव्यात् ॥१०९॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


तत्राधारे दीप्यन् पात्रोभयतः प्रभाकरः श्रीमान् ।
द्वादशकलासमेतो ध्वान्तं मम बहुलमान्तरं छिन्द्यात् ॥११०॥

तस्मिन् दिनेशपात्रे तरङ्गितामोदममृतमयगदीर्घम् ।
चन्द्रकलात्मकममृतं सान्द्रीकुर्यादमन्दमानन्दम् ॥१११॥

अमृतेतस्मिन्नभितो विहरन्त्यो विविधमणितरणिभाजः ।
षोडशकलाः सुधांशोः शोकादुत्तारयन्तुमामनिशम् ॥११२॥

अत्रैव विहृतिभाजोधातृमुखानाञ्च कारणेशानाम् ।
सृष्ट्ययादिरूपकान्ताः शमयन्त्वखिलाः कलाश्च सन्तापम् ॥११३॥

कीनाशवरुणकिन्नरराजदिगन्तेषु रत्नगेहस्य ।
कलयान्वितान्यजस्रं कलयन्त्वा [नन्द] मर्घपात्राणि ॥११४॥

पात्रस्थलस्य पुरतः पद्मारमणविधिपार्वतीशानाम् ।
भवनानि शर्मणे नो भवन्तुभासाप्रदीपितजगन्ति ॥११५॥

सदनस्यानलकोणे सततं प्रणाममि कुण्डमाग्नेयम् ।
तत्रस्थितञ्च बर्हि तरलशिखाजटिलमम्बिकाजननम् ॥११६॥

तस्याः शरदिशि तादृशरत्नपरिस्फुरितपर्वनवकाढ्यम् ।
चक्रात्मकं शताङ्गं दशयोजनमुन्नतं भजे दिव्यम् । ११७॥

तत्रैव दिशि निषण्णं तपनीयध्वजपरम्पराश्लिष्टम् ।
रथमपरञ्चभवया रचयामो मनसि रत्नमयचूड़म् ॥११८॥

भवनस्य वामभागे परिष्कृतो विविधवैजयन्तीभिः ।
रचयतु मुदं रथेन्द्रः सचिवेशाख्याः समस्तवन्द्यायाः ॥११९॥

रुद्रदिशि रत्नधाम्नो रुचिरपताकाप्रपञ्चकञ्चुकितम् ।
कुर्मोहृदि पुनरनिशंकोलास्यायाः शताङ्गमूर्द्धन्यम् ॥१२०॥

परितो देवीधाम्नः प्रणीतवासा मनुस्वरूपिण्यः ।
कुर्वन्तु रक्षमालाकृतयः कुशलानि देवता निखिलाः ॥१२१॥

प्राग्द्वारस्य भवानीधाम्नः पार्श्वद्वयारचितवासे ।
मातङ्गीकटमुख्ये मणिसदने मनसि भावयामि चिरम् ॥१२२॥

योजनयुगलाभोगा तत्परिणाहा वलयमणिभित्तिः ।
चिन्तामणिगृहभूमिर्जायादाम्नायमयचतुर्द्वारा ॥१२३॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



द्वारे द्वारे धाम्नः पिण्डीभूता नवेनबिम्बाभाः ।
विदधतु विमलांकीर्त्तिं दिव्या लौहित्यसिद्धयो देव्यः ॥१२४॥

मणिसदनस्यान्तरतो महनीये रत्नवेदिकामध्ये ।
बिन्दुमयचक्रमीड़े पीठानामुपरि विरचितावासम् ॥१२५॥

चक्राणां सकलानां प्रथममधःसीम्निकनकवास्तव्याः ।
अणिमादिसिद्धयः स्यु शुभाय हरिणाङ्कखण्डकृतचूड़ाः ॥१२६॥

भद्रं पक्ष्मलयन्तु ब्राह्मीमुख्याश्च मातरो मत्ताः ।
द्युमणिशशिचित्रभानुद्युतिदेहद्योतिताखिलदिगन्ताः १२७॥

तस्योपरिमणिफलके तारुण्योत्तुङ्गपीनकुचभाराः ।
सङ्क्षोभिणीप्रधानाः श्रान्ति विद्रावयन्तु दशमुद्राः ॥१२८॥

फलकत्रयस्वरूपे पृथुले त्रैलोक्यमोहने चक्रे ।
दीव्यन्तीप्रकटाख्यास्तासां कीर्त्तिश्च भगवती वेद ॥१२९॥

तदुपरि विमले धिष्णे तरलदृशस्तरुणकोकनदभासः ।
कामाकर्षिण्याद्याः कलये देवीः कलाधरशिखण्डाः ॥१३०॥

सर्वासामपि पूरकचक्रेऽस्मिन् गुप्तयोगिनीसेव्या ।
त्रिपुरेशी मम दुरितं त्रुट्यात्कण्ठा [स्र] मणिहारा

तस्योपरिनाम्राम्बुरुहसमूह-प्रभापटलशोणाः ।
ध्यायाम्यनङ्गकुसुमाप्रमुखा देवीश्चविधृतकूर्पासाः ॥१३२॥

सङ्क्षोभकारकेऽस्मिंश्चक्रे श्रीत्रिपुरसुन्दरी साक्षात् ।
गोप्त्री गुप्ततराख्या गोपायतु मां कृपार्द्रया दृष्ट्या ॥१३३॥

सङ्क्षोभिणीप्रधानाः शक्तीस्तस्योर्द्ध्वलयकृतवासाः ।
आलोलनीलवेणीरन्तः कलयामि यौवनोन्मत्ताः ॥१३४॥

सौभाग्यदायकेऽस्मिंश्चक्रे श्रीत्रिपुरसुन्दरी जीयात् ।
शक्त्याश्च सम्प्रदायादिकाःसमस्ताः प्रसादयन्त्वनिशम् ॥१३५॥

मणिपीठोपरि तासां महति चतुर्नल्वविश्रुते वलये ।
सन्ततरचितावासाः शक्तीः कलयामि सर्वसिद्धिमुखाः ॥१३६॥

सर्वार्थसाधके चक्रेऽमुष्मिन्समस्तफलधात्री ।
त्रिपुराश्रीर्मंमकुशलं दिशतादुत्तीर्णयोगिनी सेव्या ॥१३७॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


तासान्निलयस्योपरिधिष्णे कौस्तुभकञ्चुकमनोज्ञाः ।
सर्वज्ञाद्या देव्यः सकलाः सम्पादयन्तु मे कीर्त्तिम् ॥१३७॥

चक्रे समस्तकरनामन्यस्मिन्समस्तजनसेव्याम् ।
मनसि मम भर्गसहितां मन्ये श्रीत्रिपुरमानिनीं देवीम् ॥१३९॥

सर्वज्ञासदनोपरि चक्रे विपुले समाकलितदेहाः ।
बन्दे वशिनीमुख्याः शक्तीः सिन्दूररेणुशोणरुचः ॥१४०॥

श्रीसर्वरोगहारिणिचक्रेऽस्मिंस्त्रिपुरपूर्विकांसिद्धाम् ।
बन्दे रहस्यनाम्ना वेद्याभिःसर्वदा सेव्याम् ॥१४१॥

वशिनीगृहोपरिष्टाद्विंशतिहस्तोन्नते पीठे ।
शमयन्तु शत्रुवृन्दं शस्त्राण्यस्त्राणि चादिसम्पत्त्याः ॥१४२॥

शस्त्रसदनोपरिष्टाद्वलये बलवैरिसङ्घसङ्घटिते ।
कामेश्वरीप्रधानाः कलये देवीः समस्तजनवन्द्याः ॥१४३॥

कामेश्वरीगृहोपरि वलये विविधमनुसम्प्रदायज्ञाः ।
चत्वारो युगनाथा जयन्तु मित्रेशपूर्वका गुरवः ॥१४४॥

नाथभवनोपरिष्टान्नानारत्नचयमेदुरे पीठे ।
कामेश्वर्यो निखिलाः कलयन्तु मुदंतिथिस्वरूपिण्यः ॥१४५॥

नित्यासदनस्योपरि निर्मलमणिनिवहरचितछिण्णे ।
कुशलं षड़ङ्गदेव्यः कलयन्त्वस्माकमुत्तरलनेत्राः ।१४६

सदनस्योपरि तासां सर्वानन्दमयनामके विन्दौ ।
पञ्चब्रह्मकारं मञ्चंप्रणमामिमणिगणाकीर्णम् ॥१४७॥

परितो मणिचमञ्चस्यप्रलम्बमाना नियन्त्रितापाशैः ।
मायामयी जवनिका मम दुरितं हरतु मेचकच्छाया ॥१४८॥

मञ्चस्योपरि लम्बन्मल्लीपुन्नागमालिकाभरितम् ।
दरनीलमयवितानं हरतादालस्यमनिशमस्माकम् ॥१४९॥

पर्यङ्कस्य भजामः पादान् बिम्बाम्बुहेमरुचः ।
अजहरिरुद्रेशमयाननलाशरमारुतेशकोलस्थान् ॥१५०॥

फलकं सदा शिवमयं प्रणौमि सिन्दूररेणुकिरणाभम् ।
आरुह्याङ्कासीनां सदनाकलितं च तत्त्वसोपानम् ॥१५१॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


पुष्पोपधानकन्दुकचतुष्टयस्फुरितपाटलास्तरणम् ।
पर्यङ्कोपरि घटितं पातु चिरं हंसतूलिकाशयनम् ॥१५२॥

तस्योपरिनिवसन्तां तारुण्यश्रीनिषेवितं सततम् ।
आवृन्तफुल्लहल्लकमरीचिकापुञ्जमञ्जनच्छायम् ॥१५३॥

सिन्दूरशोणवसनंशीतांशुस्तवकचुम्बितकिरीटम् ।
कुङ्कुमतिलकमनोहरकुटिलालकहसितकुमुदबन्धुशिशुम् ॥१५४॥

पूर्णेन्दुबिम्बवदनंफुल्लसरोजातलोचनत्रितयम् ।
तरलापाङ्गतरङ्गितशफराङ्गनशास्त्रसम्प्रदायार्थम् ॥१५५॥

मणिमयकुण्डलपुष्यन्मरीचिकल्लोलमांसलकपोलम् ।
विद्रुमसहोदराधरविसृत्वरस्मरकिशोरसञ्चारम् ॥१५६॥

आमोदिकुसुमशेखरमानीलभ्रूलतायुगमनोज्ञम् ।
वीटीसौरभवीचीद्विगुणितवदनारविन्दसौभाग्यम् ॥१५७॥

पाशाङ्कुशेक्षुचापप्रसवशरस्फुरितकोमलकराब्जम् ।
काश्मीरपङ्किलाङ्गं कामेशम्मनसि कुर्महे सततम् ॥१५८॥

तस्याश्च भुविनिषण्णान्तरुणकदम्बप्रसूनकिरणाभाम् ।
शीतांशुखण्डचूड़ां सीमन्तन्यस्तसिन्दूराम् ॥१५९॥

कुङ्कुमललामभास्वन्निटिलांकुटिलतरभ्रल्लिकायुगलाम् ।
नालीकसदृशनयनां नासाञ्चलकलितमौक्तिकाभरणाम् ॥१६०॥

अङ्कुरितमन्दहासामरुणाधरकान्तिबिम्बाभाम् ।
कमनीयमकरिकायुतकपोलसङ्क्रान्तकनकताटङ्काम् ॥१६१॥

कर्पूरसान्द्रवीटीकवलितवदनारविन्दकमनीयाम् ।
कम्बुसहोदरकण्ठप्रलम्बमानाच्छमौक्तिककलापाम् ॥१६२॥

कह्लारदामसुन्दरभुजयुगलस्फुरितकेयूराम् ।
करपद्ममूलविलसत्काञ्चनमयकटकवलयसन्दोहाम् ॥१६३॥

पाणितुष्टयविलसत्पाशाङ्कुशपुण्ड्रचापपुष्पास्त्राम् ।
कूलङ्कपकुचशिखराङ्कुङ्कुमकर्दमितरत्नकूर्पासाम् ॥१६४॥

अणुदायादवलग्नामम्बुदशोभासनाभिरोमलताम् ।
माणिक्यचित्रकाश्रीमरीचिकाक्रान्तमांसलनितम्बाम् ॥१६५॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


सरलोरुकाण्डयुगलांजङ्घाजितकामजैत्रतूणीराम् ।
प्रपदपरिभूतकूर्माम्पल्लवसच्छायपादपमनोज्ञाम् ॥१६६॥

कमलभवकमललोचनकिरीटरत्नांशुरञ्जितपदाब्जाम् ।
उन्मस्तकानुकम्पामुत्तरलापाङ्गपोषितानङ्गाम् ॥१६७॥

आदिमरसावलम्बामनिशं प्रथमोक्तिबल्लरीकलिकाम् ।
आब्रह्मकीटजननीमनिशं कलयामि सुन्दरीमन्तः ॥१६८॥

कस्तु क्षितौ पटीयान् वस्तु स्तातुं शिवाङ्कवास्तव्यम् ।
अस्तु चिरन्तनपुण्यैः प्रस्तुतकाम्याय तन्मम पुरस्तात् ॥१६९॥

प्रभुसम्मितोक्तिगम्यं परमशिवोत्सङ्गपर्यङ्कम् ।
तेजः किञ्चन दिव्यं पुरतो मे भवतु पुण्ड्रकोदण्डम् ॥१७०॥

मधुरिपुभरितशरासं मकरन्दस्यन्दिमार्गणोदारम् ।
कैरविणीविटचूडं कैवल्यायास्तु किञ्चन महो नः ॥१७१

अक्षुद्रभिक्षुचापं परोक्षमवलग्नसीमनि त्र्यक्षम् ।
क्षपयतु नः क्षेमेतरमुक्षरथप्रेमपक्ष्मलन्तेजः ॥१७२॥

भृङ्गरुचिहरापाङ्गं शृङ्गारोत्तुङ्गमरुणाङ्गम् ।
मङ्गलमभङ्गुरम्मे घटयतु गङ्गाधराङ्गसङ्गिपदः ॥१७३॥

प्रपदजितकूर्मम्मि [ल] करुणं धर्मरुचिनिर्मथनदेहम् ।
श्रुतिमर्मनर्मशम्भोः किञ्चन [मे] शर्म निर्मातु ॥१७४॥

कालकुटिलालकावलिकन्दलविजितालिविधृतमाणिक्यम् ।
कीलयतु हृदिपुलिनजघनंबहुलितकरं किञ्चन महोनः ॥१७५॥

कुङ्कुमतिलकितफालाःकुरुविन्दच्छायपाटलदुकूलाः ।
करुणापयोधिवेलाः काश्चन कुर्वन्तु मे लीलाः ॥१७६॥

पुष्पन्धयरुचिवेण्यः पुलिनाभोगत्रपाकरश्रोण्यः ।
जीयासुरिक्षुपाल्यः काश्चन कामारिकेलिसाक्षिण्यः ॥१७७॥

तपनायांशुकभांसि द्राक्षामाधुर्यनास्तिकवचांसि ।
कतिचन शुचं महांसिक्षपयन्तु कपालितोपितमांसि ॥१७८॥

असितकचं [नयनाञ्चलपरिसरसंसर्पि] कूलमुद्वहकृपाद्रं म् ।
आदिमरसाधिदैवतमन्तः कलये हराङ्गधासिमहः ॥१७९॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


कर्णोपान्ततरङ्गितकटाक्षनि [स्पन्दपोषितानङ्गान्] ।
कामेश्वराङ्कनिलयां कामपि विद्यांपुरातनीं कलये ॥१८०॥

अरबिन्दकान्तिसोदरविलोचनद्वन्द्वसुन्दरमुखेन्दु ।
छन्दःकन्दलमन्दिरमन्तःपुरमैन्दुशेखरं बन्दे ॥१८१॥

बिम्बनिकुरम्बड़म्बर [विड़म्बिदन्तच्छद] मम्बरवलग्नम् ।
कम्बुगलमम्बुदकचं बिम्बं किमपि चुम्बतु मनो मे ॥१८२॥

शम्पारुण्यविगर्हासम्पादककान्तिकवचितदिगन्तम् ।
सिद्धान्तं निगमानां शुद्धान्तं कमपिशूलिनः कलये ॥१८३॥

उद्यद्दिनकरशोणानुत्पलबन्धुस्तनन्धयापीड़ान् ।
करकलितपुण्ड्रचापान्कलये कानपि कपर्दिनः प्राणान् ॥१८४॥

रशनालसज्जघनया रशनाजीव्रातुचापभासुरया ।
[अब्जविजय) करशरयाघ्रातश्चित्तं कयापि वासनया ॥१८५॥

नवयावकभासिशयान्वितयामितयानया दयाभरया ।
धृतयामिनीशकलया धियाकयाचिच्छ्रिता मया हि वयम् ॥१८६॥

अलमलमकुसुमबाणैरबिम्बशोणैरपुण्ड्रकोदण्डैः ।
अकुमुदबान्धवचूडैरन्यैरिह जगति दैवतम्मन्यैः ॥१८७॥

कुवलयसदृक्षनयनैः कुवलयगिरिबन्धुकचभारैः ।
करुणागन्धिकटाक्षैः कवचितचित्तोऽस्मिकतिपयैः कुतुकैः ॥१८८॥

नतजनसुलभायनमो नालीकसनाभिलोचनाय नमः ।
नन्दितगिरिशाय नमो महसे तपनीयपाटलाय नमः ॥१८९॥

कादम्बकुसुमदाम्ने कायच्छायाकणायितार्यम्णे ।
सीम्ने चिरन्तनगिरां भूम्ने कस्मैचिदादधे प्रणतिम् ॥१९०॥

कुटिलकबरीभरेभ्यः कुङ्कुमसब्रह्मचारिकिरणेभ्यः ।
कूलङ्कषस्तनेभ्यः कुर्मः प्रणतिं कुलाद्रिकुतुकेभ्यः ॥१९१॥

कोकनदशोणचरणात्कोमलकबरालिविजितशैवालात् ।
उत्पलसगन्धिनयनादुररीकुर्मो न देवतामन्याम् ॥१९२॥

आपाटलाधराणामानीलस्निग्धकब्बुरकचानाम् ।
आम्नायजीवनानामाकूतानां हरस्यदासोऽस्मि ॥१९३॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)


पुञ्जितहासविलासस्फुरितासु पुराहिताङ्कनिलयासु ।
मग्नम्मनो मदीयं कास्वपि कामारिजीवनाड़ीषु ॥१६४॥

ओं, ललिता पातु शिरो मे ललाटमम्बा च मधुमतीरूपा ।
भ्रूयुगलञ्च भवानी पुष्पशरा पातु लोचनद्वन्द्वम् ॥१६५॥

पायान्नासां बाला सुभगा दन्ताँश्च सुन्दरी जिह्वाम् ।
अधरोष्ठमादिशक्तिश्चक्रेशी पातु सर्वदा चिबुकम् ॥१६६॥

कामेश्वरी च कर्णौं कामाक्षी पातु गण्ड़योर्युगलम् ।
शृङ्गारनायिकाव्याद् वक्त्रं सिंहासनेश्वरी च गलम् ॥१६७॥

स्कन्दप्रसूश्च पातु स्कन्धौ बाहूच पाटलाक्षीमे ।
पाणी च पद्मनिलया पायादनिशं नखावलीं विजया ॥१६८॥

कोदण्डिनी च वक्षः कुक्षिं चाव्यात्कुलाचलतनूजा ।
करुणामयी वलग्नं कटिञ्च पायात् कलाधरशिखण्डा ॥१६९॥

ऊरुद्वयञ्च पायादुमा मृड़ानी च जानुनी रक्षेत् ।
जङ्घे च षोड़शी मे पायात्पादौ च पाशशृणिहस्ता ॥२००॥

प्रातः पातु च रामा मध्याह्ने पातु मां गृहाधीशा ।
शर्वाण्यवतु च सायं पायाद्रात्रौ च भैरवी साक्षात् ॥२०१॥

भार्यां रक्षतु गौरी पायात्पुत्रांश्च बिन्दुगृहपीठा ।
श्रीविद्या च यशोमे शीले चाव्याच्चिरं महाराज्ञी ॥२०२॥

पवनमयि पावकमयि क्षोणिमयि व्योममयि कृपीटमयि ।
रविमयि शशिमयि दिङ्मयि समयमयि प्राणमयि शिवे पाहि ॥२०३॥

कालिकपालिनि भरवि मातङ्गि पद्मिनि त्रिपुरे ।
वाग्देवि विन्ध्यवासिनि बाले भुवनेशि पालय चिरं माम् ॥२०४॥

अभिनवसिन्दूराभामम्बां सच्चिन्तयन्ति ये हृदये ।
उपरि नियतन्ति तेषा मुत्पलनयनाकटाक्षकल्लोलाः ॥२०५॥

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)



रक्षाष्टकमिलिताभिर्वशिनीमुख्याभिरावृतां भवतीम् ।
चिन्तयतां सितवर्णां वाचो निर्यान्त्ययत्नतो वदनात् ॥२०६॥

कनकशलाकागौरीं कर्णव्यालोलकुण्डलद्वितयाम् ।
प्रहसितमुखीञ्च भवतीं ध्यायन्तो येत एव भूधनदाः ॥२०७॥

शीर्षारुभोरुहमध्ये शीतलपीयूषवर्षिणीं भवतीम् ।
अनुदिनमनुचिन्तयतां मायुष्यं भवति पुष्कलमवन्याम् ॥२०८॥

मधुरस्मितां मदारुणनयनां मातङ्गकुम्भवक्षोजाम् ।
चन्द्रावतंसिनीं त्वां सविधे पश्यन्ति सुकृतिनः केचित् ॥२०९॥

ललितायाः स्तवरत्नं ललितपदाभिः प्रणीतमार्याभिः ।
अनुदिनमवनौ पठतां फल नि वक्तुं प्रगल्भते सैव ॥२१०॥

इति श्रीमन्महाकुलाचार्यमहर्षिदुर्वाससा कृतार्याद्विशती ।
श्रीमन्महात्रिपुरसुन्दरी दक्षिणकालीमहोग्रतारार्पणमस्तु।

श्रीरस्तु ।

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)

Digitization by Hindu-Heritage-Foundation of America. HHFA(USA)